# मुकुन्द माला

घुष्यते यस्य नगरे रङ्ग यात्रा दिने दिने।
तमहं शिरसा वन्दे राजानं कुलशेखरम्॥

श्री वल्लभेति वरदेति दयापरेति
भक्त प्रियेति भवलुण्ठन कोविदेति
नाथेति नाग शयनेति जगन्निवासेति
आलापनं प्रतिपदं कुरु मे मुकुन्द ॥ १॥

जयतु जयतु देवो देवकी नन्दनोऽयं
जयतु जयतु कृष्णो वृष्णि वंश प्रदीपः ।
जयतु जयतु मेघ श्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वी भारनाशो मुकुन्दः ॥ २॥

मुकुन्द मूर्ध्ना प्रणिपत्य याचे
भवन्तम् एकान्तम् इयन्तम् अर्थम् ।
अविस्मृतिः त्वच्चरणारविन्दे
भवे भवे मेऽस्तु भवत् प्रसादात् ॥ ३॥

नाहं वन्दे तव चरणयोर् द्वन्द्वम् अद्वन्द्व हेतोः ।
कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम्।
रम्या रामा मृदु तनुलता नन्दने नापि रन्तुं
भावे भावे हृदय भवने भावयेयं भवन्तम् ॥ ४॥

नास्था धर्मे न वसुनिचये नैव कामोप भोगे
यद्यद् भव्यं भवतु भगवन् पूर्व कर्मानु रूपम् ।

एतत् प्रार्थ्यं मम बहुमतं जन्म जन्मान्तरेऽपि
त्वत् पादाम्भोरुह युग गता निश्चला भक्तिरस्तु ॥ ५॥

दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक प्रकामम् ।
अवधीरित शारदार विन्दौ
चरणौ ते मरणेऽपि चिन्तयानि ॥ ६॥

कृष्ण त्वदीय पदपङ्कज पञ्जरान्तम्
अद्यैव मे विशतु मानस राजहंसः ।
प्राण प्रयाण समये कफवात पित्तैः
कण्ठावरोधन विधौ स्मरणं कुतस्ते ॥ ७॥

चिन्तयामि हरिमेव सन्ततं
मन्द मन्द हसित आननाम्बुजम् ।
नन्दगोप तनयं परात्परं
नारदादि मुनि बृन्द वन्दितम् ॥ ८॥

कर चरण सरोजे कान्तिमन् नेत्र मीने
श्रममुषि भुजवीचि व्याकुले अगाधमार्गे।
हरि सरसि विगाह्यापीय तेजो जलौघं
भवमरु परिखिन्नः खेदमद्य त्यजामि॥९॥

सरसिज नयने सशङ्ख चक्रे
मुरभिदि मा विरमस्व चित्त रन्तुम् ।

सुखतरमपरं न जातु जाने
हरि चरण स्मरण अमृतेन तुल्यम् ॥ १० ॥

माभीर् मन्दमनो विचिन्त्य बहुधा यामीश्चिरं यातनाः
नामी नः प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्ति सुलभं ध्यायस्व नारायणं
लोकस्य व्यसनाप नोदन करो दासस्य किं न क्षमः ॥ ११ ॥

भवजलधि गतानां द्वन्द्व वाता हतानां
सुत दुहितृ कळत्र त्राण भारार्दितानाम् ।
विषम विषय तोये मज्जताम् अप्लवानां
भवतु शरणमेको विष्णुपोतो नराणाम् ॥ १२ ॥

भवजलधिम् अगाधं दुस्तरं निस्तरेयं
कथम् अहम् इति चेतो मा स्म गाः कातरत्वम् ।
सरसिज दृशि देवे तावकी भक्ति रेका
नरकभिदि निषण्णा तारयिष्यति अवश्यम् ॥ १३ ॥

तृष्णा तोये मदन पवन उद्धूत मोह ऊर्मि माले
दारावर्ते तनय सहज ग्राह सङ्घाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादाम् भोजे वरद भवतो भक्ति नावं प्रयच्छ ॥ १४ ॥

माद्राक्षं क्षीणपुण्यान् क्षणमपि भवतो भक्तिहीनान् पदाब्जे
माश्रौषं श्राव्य बन्धं तव चरितम् अपास्य अन्यद् आख्यान जातम् ।

मास्मार्षं माधव त्वामपि भुवन पते चेतस अपह्नुवानान्

माभूवं त्वत् सपर्या व्यतिकर रहितो जन्म जन्मान्तरेऽपि ॥ १५॥

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं

पाणिद्वन्द्व समर्चय अच्युत कथाः श्रोत्रद्वय त्वं श्रुणु ।

कृष्णं लोकय लोचनद्वय हरेर् गच्छ अङ्घ्रि युग्मालयं

जिघ्र घ्राण मुकुन्दपाद तुलसीं मूर्धन् नमाधोक्षजम् ॥ १६॥

हे लोकाश्शृणुत प्रसूति मरण व्याधेः चिकित्सामिमां

योगज्ञाः समुदाहरन्ति मुनयो यां याज्ञवल्क्यादयः ।

अन्तर् ज्योतिः अमेयम् एकम् अमृतं कृष्णाख्यम् अपीयतां

तत्पीतं परमौषधं वितनुते निर्वाणम् आत्यन्तिकम् ॥ १७॥

हे मर्त्याः परमं हितं श्रुणुत वो वक्ष्यामि संक्षेपतः

संसारार्णवम् आपदूर्मि बहुलं सम्यक् प्रविश्य स्थिताः ।

नाना ज्ञानम् अपास्य चेतसि नमो नारायणायेत्यमुं

मन्त्रं सप्रणवं प्रणाम सहितं प्रावर्तयध्वं मुहुः ॥ १८॥

पृथ्वी रेणुरणुः पयांसि कणिकाः फल्गु स्फुलिङ्गोऽनलः

तेजो निश्वसनं मरुत् तनुतरं रन्ध्रं सुसूक्ष्मं नभः ।

क्षुद्रा रुद्र पितामह प्रभृतयः कीटाः समस्तास् सुराः ।

दृष्टे यत्र स तावको विजयते भूमा अवधूता वधिः ॥ १९॥

बद्धेनाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैः

कण्ठेन स्वर गद् गदेन नयनेन उद्गीर्ण बाष्पाम्बुना ।

नित्यं त्वच्चरणारविन्द युगल ध्यानाम्रुत अस्वादिनाम्
अस्माकं सरसीरुहाक्ष सततं संपद्यतां जीवितम् ॥ २० ॥

हे गोपालक हे कृपाजलनिधे हे सिन्धु कन्यापते
हे कंसान्तक हे गजेन्द्र करुणा पारीण हे माधव ।
हे रामानुज हे जगत्त्रयगुरो हे पुण्डरीकाक्ष मां
हे गोपी जननाथ पालय परं जानामि न त्वां विना ॥ २१ ॥

भक्तापाय भुजङ्ग गारुडमणिः त्रैलोक्य रक्षामणिः
गोपी लोचन चातकाम् बुद मणिः सौन्दर्य मुद्रामणिः ।
यः कान्तामणि रुक्मिणी घनकुच द्वंद्वैक भूषा मणिः
श्रेयो देव शिखामणिर् दिशतु नो गोपाल चूडामणिः ॥ २२ ॥

शत्रुच्छेदैक मन्त्रं सकलम् उपनिषद् वाक्य सम्पूज्य मन्त्रं
संसारोत्तार मन्त्रं समुपचित तमस्सङ्घ निर्याण मन्त्रं ।
सर्वैश्वर्यैक मन्त्रं व्यसन भुजग-संदष्ठ सन्त्राण मन्त्रं
जिह्वे श्री कृष्ण मन्त्रं जप जप सततं जन्म साफल्य मन्त्रम् ॥२३ ॥

व्यामोह प्रशमौषधं मुनि मनोवृत्ति प्रवृत्त् यौषधं
दैत्येन्द्रार्तिकर् औषधं त्रिजगतां सञ्जीवनैक औषधम् ।
भक्तात्यन्त हितौषधं भव भय प्रध्वंसनैक औषधं
श्रेयः प्राप्तिकर् औषधं पिब मनः श्री कृष्ण दिव्यौषधम् ॥ २४ ॥

आम्नायाभ्य सनानि अरण्य रुदितं वेदव्रतानि अन्वहं
मेदश्छेदफलानि पूर्त विधयः सर्वे हुतं भस्मनि ।

तीर्थानाम् अवगाहनानि च गजस्नानं विना यत्पद
द्वन् द्वाम् भोरुह संस्मृतीर् विजयते देवस्स नारायणः ॥ २५॥

श्रीमन् नाम प्रोच्य नारायणाख्यं
के न प्रापुर् वाञ्छितं पापिनोऽपि ।
हा नः पूर्वं वाक्प्रवृत्ता न तस्मिन्
तेन प्राप्तं गर्भ वासादि दुःखम् ॥ २६॥

मज्जन्मनः फलमिदं मधु कैठभारे
मत्प्रार्थनीय मदनुग्रह एष एव ।
त्वद् भृत्य भृत्य परिचारक भृत्य भृत्य-
भृत्यस्य भृत्य इति मां स्मर लोक नाथ ॥ २७॥

नाथे नः पुरुषोत्तमे त्रिजगताम् एकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति ।
यं कञ्चित् पुरुषाधमं कतिपयग्रामेशम् अल्पार्थदं
सेवायै मृगयामहे नरं अहो मूका वराका वयम् ॥ २८॥

मदन परिहर स्थितिं मदीये
मनसि मुकुन्द पदार विन्द धाम्नि ।
हर नयन कृशानुना कृशोऽसि
स्मरसि न चक्र पराक्रमं मुरारेः ॥ २९॥

तत्त्वं ब्रुवाणानि परं परस्मात्
मधु क्षरन्तीव सतां फलानि ।

प्रावर्तय प्राञ्जलिर् अस्मि जिह्वे
नामानि नारायण गोचराणि ॥ ३० ॥

इदं शरीरं परिणाम पेशलं
पतत्यवश्यं श्लथ सन्धि जर्जरम् ।
किमौषधैः क्लियसि मूढ दुर्मते
निरामयं कृष्ण रसायनं पिब ॥ ३१ ॥

दारा वारा कर वर सुता ते तनूजो विरिञ्चिः
स्तोता वेदस्तव सुरगणो भृत्यवर्गः प्रसादः ।
मुक्तिर् माया जगद् अविकलं तावकी देवकी ते
माता मित्रं वलरिपुसुतः त्वय्यते अन्यन् न जाने ॥ ३२ ॥

कृष्णो रक्षतु नो जगत् त्रयगुरुः कृष्णं नमस्याम्यहं
कृष्णेन अमर शत्रवो विनिहताः कृष्णाय तुभ्यं नमः ।
कृष्णा देव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे तिष्ठति सर्वम् एतद् अखिलं हे कृष्ण रक्षस्व माम् ॥ ३३ ॥

तत्त्वं प्रसीद भगवन् कुरु मय्य नाथे
विष्णो कृपां परम कारुणिकः किल त्वम् ।
संसार सागर निमग्नम् अनन्त दीनम्
उद्धर्तुम् अर्हसि हरे पुरुषोत्तमोऽसि ॥ ३४ ॥

नमामि नारायण पाद पङ्कजं
करोमि नारायण पूजनं सदा ।

मुकुन्द माला

वदामि नारायण नाम निर्मलं

स्मरामि नारायण तत्त्वम् अव्ययम् ॥ ३५॥

श्री नाथ नारायण वासुदेव

श्री कृष्ण भक्तप्रिय चक्र पाणे।

श्री पद्मनाभ अच्युत कैटभारे

श्री राम पद्माक्ष हरे मुरारे॥३६॥

अनन्त वैकुण्ठ मुकुन्द कृष्ण

गोविन्द दामोदर माधवेति ।

वक्तुं समर्थोऽपि न वक्ति कश्चित्

अहो जनानां व्यसनाभि मुख्यम् ॥ ३७॥

ध्यायन्ति ये विष्णुम् अनन्तं अव्ययम्

हृत्पद्म मध्ये सततं व्यवस्थितम्।

समा हितानां सतताभयप्रदं

ते यान्ति सिद्धिं परमाञ्च वैष्णवीम्॥ ३८॥

क्षीर सागर तरङ्ग शीकराऽऽ सार

तारकित चारु मूर्तये ।

भोगि भोग शयनीय शायिने

माधवाय मधु विद्विषे नमः ॥ ३९॥

यस्य प्रियौ श्रुतधरौ कविलोक वीरौ मित्रे द्विजन्मवर पारशवा वभूताम् ।

तेनाम् बुजाक्ष चरणाम् बुज षट्पदेन राज्ञा कृता कृतिरियं कुलशेखरेण ॥ ४०॥